© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# पाठ्यचर्या, पाठ्यक्रमः, पाठ्यवस्तु



**डा.डि.वेणुगोपालरावः**
अंशकालिकाध्यापकः,
शिक्षाशास्त्रविभागः, गुरुवायूरपरिसरः, केरलम्।

**शोधालेखसारः–** पाठ्यक्रमस्तु औपचारिकरूपेण कक्ष्याप्रकोष्ठेषु अध्यापकै: पाठ्यमानविषयाणां समूह:इति, तथा पाठ्यचर्या तु कक्ष्याया:अन्त:बहिर्वापाठ्यवस्तुपाठ्यक्रमं चाधारीकृत्य छात्रस्य तथा विद्यालयस्य च लक्ष्यसिद्ध्यै सम्पूर्णविद्यालयकाले अध्यापकै:, छात्रै:, शिक्षाविद्भि: क्रियमाणशैक्षिककार्यकलापानां सङ्गतिरिति वक्तुं शक्यते। तार्किकतया विचार: क्रियते चेत्पाठ्यवस्तु तु विषयावबोधनाय, पाठ्यक्रमस्तु विज्ञानसोपानाधिरोहणाय, पाठ्यचर्या तु अधीतज्ञानस्य आचरणेसमानेतुं च शिक्षाक्षेत्रेषु विधीयमानकार्यक्रमा: इति ज्ञायन्ते। पाठ्यवस्तुसम्पूर्णपाठ्यक्रमे कश्चन भाग:, पाठ्यक्रम: नैकपाठ्यवस्तुसहितविषयसमूह: भवति।


**मुख्य: शब्द:–** कक्ष्याया:, अन्त:, पाठ्यक्रम:, पाठ्यचर्या, पाठ्यवस्तु

शिक्षैकातादृशी प्रक्रिया वर्तते यस्या: स्वरूपंप्रतिक्षणंपरिवर्तते। एकमुखप्रक्रिया, द्विमुखप्रक्रिया, त्रिमुखीप्रक्रिया, बहुमुखप्रक्रिया इतिबहुधा कथ्यमानाया: अस्या: प्रक्रियायां पाठ्यचर्या,पाठ्यक्रम:, पाठ्यवस्तुइतीमानि त्रीणिपदानि औपचारिकबालकेन्द्रितशिक्षाव्यवस्थायामस्यां बलकसर्वाङ्गीणविकासाय स्वीययोगदाने सार्थकपदानिविद्यन्ते। शिक्षाविचारजगतिअमीषांशब्दानांविचारेविविधता प्रत्येकस्मिन् शिक्षाग्रन्थे दरीदृश्यते। तथापि पाठ्यवस्तु निश्चिते समये निश्चिते अन्तरेपाठ्यमान: अध्यापकेन चित: कश्चन सीमितविषय:इति, पाठ्यक्रमस्तु औपचारिकरूपेण कक्ष्याप्रकोष्ठेषु अध्यापकै: पाठ्यमानविषयाणां समूह:इति, तथा पाठ्यचर्या तु कक्ष्याया:अन्त:बहिर्वापाठ्यवस्तुपाठ्यक्रमं चाधारीकृत्य छात्रस्य तथा विद्यालयस्य च लक्ष्यसिद्ध्यै सम्पूर्णविद्यालयकाले अध्यापकै:, छात्रै:, शिक्षाविद्भि: क्रियमाणशैक्षिककार्यकलापानां सङ्गतिरिति वक्तुं शक्यते। तार्किकतया विचार: क्रियते चेत्पाठ्यवस्तु तु विषयावबोधनाय, पाठ्यक्रमस्तु विज्ञानसोपानाधिरोहणाय, पाठ्यचर्या तु अधीतज्ञानस्य आचरणेसमानेतुं च शिक्षाक्षेत्रेषु विधीयमानकार्यक्रमा:इति ज्ञायन्ते।पाठ्यवस्तुसम्पूर्णपाठ्यक्रमे कश्चन भाग:, पाठ्यक्रम:नैकपाठ्यवस्तुसहितविषयसमूह: भवति। पाठ्यक्रमाधारेण सम्पूर्णविद्यालयसमये, आवरणे च समायोजित-शिक्षणशिक्षणेतरकार्यक्रमाणापाठ्यक्रम: प्रत्यध्यापकं भिद्यते। पाठ्यचर्या चु प्रत्यध्यापकं समानाएवभवति, विशेषावसरेभिद्यते सूक्ष्मतया एतेषु अन्तरं विशदीक्रयते-

| क्रमसंख्या - विषयः | पाठ्यवस्तु | पाठ्यक्रमः | पाठ्यचर्या |
|---|---|---|---|
| 1. | 1. Subject (Content), A lesson | 1. Syllabus (Greek term), Full Subject, or all subjects | 3. Curriculum (Latin term), Full Course |
| 2. | 1. पाठनाय चितः कश्चन विषयः। सम्पूर्णतया अध्यापकेन चितः पाठ्यमानविषयश्च। | 1. पाठनाय चितानां विषयाणां समूहः। विशेषज्ञैः, शिक्षाविद्भिश्च निर्णीतः पाठ्यवस्तुसमूहः। | 3.पाठ्यवस्तुनः तथा पाठ्य-क्रमस्य चाधारेण शिक्षाव्यव-स्थायाः, समाजस्य, छात्रस्य च लक्ष्यप्राप्तये शिक्षकैः विधीयमानकार्यक्रमाणां प्रक्रिया। |
| 3. | 1. **अवबोधस्तरः** ।अत्यन्तसीमितः, झटित्यवबोधनाय शक्यते। | 1. **ज्ञानस्तरः।** सीमितः, प्रयत्नेन सर्वमध्येतुं शक्यते। तथैव छात्रस्तरवर्धनात्मकः । | 1. **आचरणस्तरः।** व्यापकः, अधीतानां, ज्ञातानां चाचरणे विनियोगः, समन्वयनम्। |
| 4. | 1. अल्पः समयः पर्याप्तः। कक्ष्यायाः अन्ते अध्यापकस्य कार्यम् । | 1. निश्चितः समयः अपेक्षितः। सत्रान्तं शिक्षकस्य कार्यम्। | 1. सम्पूर्णविद्यालयस्य समयः गण्यते। कक्ष्यायां तथा कक्ष्यायाः बहिः शिक्षासदस्यानां कार्यम्। |
| 5. | 1. कस्यचित् पाठस्य विशेषः । **तात्कालिकः, योजनात्मकश्च। प्रायः पञ्चचत्वारिंश-न्निमेषात्मकः।** | 1.सम्पूर्णपाठ्यपुस्तकस्य विचारः। **विवरणात्मकः, वर्णनात्मकः** च। सत्रात्मकं वर्षात्मकं वा भवति। | 1. सम्पूर्णविद्यालयस्य शैक्षिक-शैक्षिकेतरकार्यक्रमसमूहः। **गतिशीलात्मकः, संकलितसिद्धः,ल विनियोगात्मकः, अन्ताभवः, स्तरश्च**। विद्यालयसमयान्तं यावत् भवति। |
| 6. | 1.मूल्याकलनाय उपकरुते। अध्यापकः परिक्षिकः, निरिक्षिकः, मूल्याङ्ककस्च भवति। | 1. मूल्याङ्कनाय उपकरोति। कक्ष्याध्यापकः, परिक्षाविभागः, विशेषज्ञाः, भिन्नविद्यालयीयाः मूल्याङ्ककाः भवन्ति। | 1. जैविककैशलवर्धनात्मकः। सर्वकारः, समाजाजिकस्स्थाः, शैक्षिकप्रशासनव्यवस्था अथवा विद्यालयो वा निर्वहति। |
| 7. | 1. पाठने,पठने च अध्यापक-च्छात्रयोः कृते सहायकं भवति। | 1. किं, कीदृशं, कियत्, कदा, कथं, कुत्र, इत्येवं द्वयोः कृते मार्गदर्शनं करोति। | 1. आचरणेन, अनुसरणेन, प्रयोगेण, अनुभवेन च आत्मसात्करोति। |
| 8. | 1. अध्यापकपाठनशक्त्याधारितः। मौखिककक्ष्यान्तःक्रियासम्बद्धः। | 1. प्रत्येकम् अध्यापकाय भिद्यते। विद्यालयीयसैद्धान्तिक-क्रियासम्बद्धः। | 1. सर्वेभ्यः अध्यापकेभ्यः समानाः। प्रायोगिकः, कृत्याधारितः, प्रत्यक्षानुभवपरः शैक्षिकप्रगत्याधारितः। |
| 9. | 1. अत्र विशिष्टशैक्षिकोपकरणानि अध्यापकाधीनानि। | 1.शैक्षिकोपकरणानि विद्यालयसीमितानि। | 1.शिक्षणोपकरणानि शैक्षिकाणि समाजिकानि च। |
| 10. | 1. अध्यापकः छात्रापेक्षया क्रियाशीलयुतः भवति। | 1. छात्राध्यापकभ्यां सह प्रबन्धकाश्च क्रियाशीलयुताः भवन्ति। | 1. छात्रस्य क्रियाशीलता अधिका तथैव अध्यापकप्रबन्धकैः सह समाजः अपि क्रियाशीलयुतः भवति। |

### भारतीयशिक्षाव्यवस्थेतिहासे पाठ्यचर्याया: औचित्यविचार:–

पाठ्यचर्या इतिपदमतीवाधुनिकमितिशिक्षाविद:। तत्रएकमुखप्रक्रियाया: गुरुकेन्द्रितशिक्षाया: आरभ्य मतप्रचारकबौद्धयवनकालिकशिक्षाप्रक्रिया यावत् शिक्षाप्रक्रियां निरीक्ष्यैवामुमभिप्रायं दृढीकुर्वन्ति पाश्चात्यशिक्षानुगामिन: सर्वेशिक्षाविद:।विश्वस्मिन्विश्वेआद्यातिपुराणेति च काचित् शिक्षाव्यवस्था जैगीयते इत्यत्र प्राच्यशिक्षाव्यावस्थैव समस्तज्ञानचक्षुषांनेत्रपथे समायाति।सा च प्राच्यशिक्षाव्यावस्था तादृशी, या विशेषनाम्नानैकस्तररहितातथा च तत्कालिकसमाजानुकूला च आसीत्। अस्यामभिभावकानां तथा गुरोश्चानुमत्या शिष्य: उपनयनसंस्कारेण शिक्षाक्षेत्रं प्रविश्य लक्षीकृताध्ययनं सर्वं समाप्यैव समाजंस्पृशतिस्म।तत्र




इत्येवं बहुधा वदन्तः पाठ्यचर्या प्राचीनभारतीयशिक्षाव्यवस्थान्तर्गता न इति आधुनिकशिक्षाविदः।

प्रायः नैतत्साधु। सा तत्र च रीतिः कदाचित् अवलोक्यते। तत्र नैकपाठ्यचर्यात्मकविचाराः प्रमाणरूपेण इतिहासरूपेणोपलभ्यन्ते।

अधीतिबोधाचरणप्रचारणैर्दशश्चतस्रः प्रणयन्नुपाधिभिः . . .।।
अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं च ब्राह्मणानामकल्पयेत् ।।
उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्यं च सन्ध्योपासनमेव च।। (मनु)
उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।

प्राचीनार्वाचीनपाठ्यचर्ययोः भेदाः

| क्र.सं | प्राचीनशिक्षाव्यवस्थायां पाठ्यचर्या | आधुनिकशिक्षाव्यवस्थायां पाठ्यचर्या |
|---|---|---|
| 1. | 1. आन्तरिकप्रक्रिया | 1. विशिष्टा, भिन्ना च प्रक्रिया |
| 2. | 1. अधिककालसीमिता, धनव्ययरहिता | 1. स्वल्पकालिकी, अधिकधनव्ययसाध्या |
| 3. | 1. सहजप्रक्रिया, केवला अध्यापकनिर्देशसहिता | 1. कृत्रिमप्रक्रिया, प्रबन्धकनिर्देशानुसारिणी |
| 4. | 1. सामाजिकी. आध्यात्मिका, शाश्वतमूल्योपेता, आदर्शा च | 1. सामाजिकपरिवर्तनाधारिता, तत्कालिकी, |
| 5. | 1. गुरोः ज्ञानप्रतिभानुभवकौशलानुसारिणी | 1. निर्दिष्टलक्ष्यानुसारिणी, छात्रविकासानुगामिनी च |
| 6. | 1. समेषां छात्राणां कृते समाना | 1. छात्राणां वैयक्तिककुशलताधारिता, |
| 7. | 1. पुस्तकनिर्देशरहिता, योग्यच्छात्रनिर्मात्री | 1. पुस्तकनिर्देशसहिता, ज्ञानयुतच्छात्रनिर्मात्री |
| 8. | 1. उच्चकोटिप्राणिक्रियामसमाना, आन्तर्गतशक्तेः बहिरानयनात्मिका च | 1. (प्रायः) यन्त्रसदृशी, आन्तर्गतशक्तेः बहिरानयनात्मिका तथैव अङ्काधारिता च । |
| 9. | 1. आचारविचारनियमादिषु परिवर्तनं न भवति। | 1. आचारविचारनियमादिषु परिवर्तनं भवति। |

**पाठ्यचर्यासंरचनाया: सम्प्रत्यय:, अर्थ:, परिभाषाश्च**

१. पाठ्यचर्याइतिशब्द:लाटिन् भाषाया: क्युररे **(Currere)**इतिलाटिन्शब्दात्निष्पन्न: यस्यार्थ: धावनमैदानमिति**(Race Course)** प्रयुक्त:।

२. पाठ्यचर्याकाचित्तादृशी प्रक्रिया वर्तते यया प्रत्येकं व्यक्ति: स्वलक्ष्यसाधनाय प्रयासरतो भवति। तत: पाठ्यचर्येयम् एकंतादृशस्थानंभवति येन शिक्षाया: स्वजीवनस्य वा लक्ष्यप्राप्ति: भवति।

३. अस्यां पाठ्यचर्याशिक्षणप्रक्रियायां काचित् निश्चिततर्कपूर्णप्रक्रिया भवति यया छात्र: सम्पूर्णतया शैक्षिकवातावरणेनप्रभावितस्सन्स्वकौशलानुगणं, स्वशक्त्यनुगुणं, सानन्देन अनुभवपूर्वकज्ञानप्राप्तये प्रेरक:भवति।

४. विद्यालयस्य प्रमुखं कार्यं भवति बालकेभ्य: शिक्षाप्रदानमिति। निर्णीतलक्ष्यानुगुणं शिक्षाप्रदानाय बालकावसरपूर्तये यानि कार्याणि क्रियन्ते तेषांसार्थकाभिधानंवर्तते पाठ्यचर्याइति। अत केचननिर्वचनावसरेका, किं, कुत्र, केन, कदा,कस्मै, कस्मात्, कस्य इत्येवं प्रश्नकरणपूर्वकप्रायोगिकक्रियैव पाठ्यचर्याइतिऊचु:।

५. पाठ्यचर्याया: परिभाषातावतीवर्तते यावती शिक्षाजीवनप्रक्रिया इति कश्चन।

६. शिक्षा यथा तथैव अस्या: पाठ्यचर्याया: सम्प्रत्ययोऽपि। सम्प्रत्यय: द्विधावर्तते। पाठ्यक्रमाधारित- कक्ष्यासम्बन्धपाठ्यचर्याइति सङ्कुचितार्थे, विस्तृतार्थे तु यानि शिक्षकमार्गदर्शनेछात्रेषु लक्ष्यानुगमनानुभवोत्पादकानि शैक्षिकाणि, शिक्षणेतराणिसर्वाणितानि कार्याणि अन्तर्भवन्ति।

अनेन सामान्यविचारेण ज्ञायते यत् धावक:धावनमैदाने स्वकौशलान्युपयुज्य धावन् यथा लक्ष्यं प्राप्नोतितथैवछात्र: विद्यलयपाठ्यक्रमशिक्षकयुते शिक्षामैदाने क्रियाशीलो भूत्वास्वानुभवप्राप्तिपूर्वकं लक्ष्यानुगामी भवतीति।

साम्प्रतिकशिक्षाभाषायां पाठ्यचर्याया: शाब्दिकार्थ:, सम्प्रत्यय:, परिभाषावाविस्तृतार्थेएव अवलोक्यते। पाठ्यचर्याया: तथा तत्संरचनाया: स्वरूपविश्लेषणेआधुनिकशिक्षाविदांचिन्तनमपिविस्तृतं व्यापकञ्च,अपि च सीमारहितावर्तते। विद्यालयप्रवेशादारभ्य अध्ययनाध्यापनाभ्यासपूर्वक-विद्यालयसमयान्तं यावत् यानि शैक्षिककार्याणि छात्रंलक्षितफलोत्पादकसामर्थ्यवन्तं कुर्वन्तितानि सर्वाण्यपि पाठ्यचर्यायाम् अन्तर्भवन्ति।विविधशिक्षणोपकरणानि, सिद्धान्ता:, विधय:, प्रयोगा:, विचारा:, चिन्तनानि, शैक्षिकक्रिया:, क्रीडासङ्गोष्ठीकार्यशालादिपाठ्यसहगामिक्रिया: इत्यादिविविभिन्नकार्यक्रमा: ये अध्यापकच्छात्रनिर्णीतपाठ्यक्रमादिषुत्रिषुफलोत्पादकसत्सम्बन्धस्थापनेसक्षमा: भवन्ति तेषांसमेषां क्षेत्रमेव पाठ्यचर्याया: क्षेत्रंभवति। मनोवैज्ञानिक–दार्शनिक–वैज्ञानिक–सामाजिक– शैक्षिकतत्त्वप्रभावितोऽयं पाठ्यचर्याया: सम्प्रत्यय: एवछात्रंसमाजादर्शकंकरोति। अत्यल्पेन समयेन, सरलरीत्या च छात्रंस्वप्रतिभानुगुणम् अध्यापकमार्गदर्शने गम्यं प्रापयतीयं पाठ्यचर्या।अत एवशिक्षाविद:केचन पाठ्यचर्यामिमां कश्चन पाठ:, काचित् प्रक्रिया, काचिदुत्पादकक्रिया, लक्ष्यसाधनोपकृत-सम्प्रेषणप्रक्रिया इतिबहुधा कथयन्ति।अनेन पाठ्यचर्येयम् छात्राय अभीष्टलक्ष्यसाधकसचैतन्यात्मिका काचति् शैक्षिकयोजना इति ज्ञायते।

- **Cunningham महोदयेन पाठ्यचर्याविषये कथितं यत् – पाठ्यचर्या कलाकारस्य (शिक्षकस्य) हस्तेविद्यमानमेकंलक्षीकृतोपकरणंभवति पाठ्यचर्या। तामेवशैक्षिकसामग्रींछात्र:**

- **Definition of the concept of curriculum** -According to the history of education, the term curriculum was originally related to the concept of a course of studies followed by a pupil in a teaching institution.
- For the majority of authors and experts, the curriculum defines – WHY, WHAT, WHEN, WHERE, HOW and WHOM to learn.

**पाठ्यचर्यासंरचनाया: उद्देश्यानि -**

- विद्यालयजीवने एव लक्ष्यानुगुणम् अधीतविषयस्य प्रायोगिकज्ञानं, तत्प्रभावफलतयो: अनुभूतिसम्पादनम्।
- छात्रस्य भाविजीवनसम्बद्धचरित्रशीलगुणकौशलादीनां मूल्याकलनं तथा मूल्याङ्कनञ्च।
- विद्यालयीयकार्यक्रमेषु छात्रस्य प्रत्यक्षभागग्रहणशक्ते: विकास:, तथा विकासक्रमस्याध्ययनम्।
- छात्रकेन्द्रितशिक्षाप्रदाने शैक्षिकीयसंसाधनानां शक्तेरुपयोग:।
- त्रिकरणशुद्ध्याअभिरुचिम्, अभिवृत्तिं च प्रदर्शयन् निर्णीतलक्ष्यसम्पादनाय अधिककालं विद्यालये स्थातुं छात्राय अवसरकल्पनम्।
- समाजापेक्षितच्छात्रनिर्माणेप्रतिक्षणम्अनुदेशनम्, उपदेशनम्, मार्गदर्शनम्, निरीक्षणञ्च ।
- प्राजातान्त्रिकपद्धत्या शैक्षिकमूल्यानां विकास:, गुरुशिष्यसमाजानां मध्ये दृढसम्बन्धस्थापनम्।
- समाजाय अपेक्षितानांसचेतनता, जागरूकता, दक्षता, सृजनात्मकता, कुशलता, युक्तता, सामाजिकता, प्रजातान्त्रिकता, औद्योगिकता, मानसिकता, स्वस्थता, व्यावहारिकता इत्यादि शैक्षिकोत्पादकतानांगुणात्मकविचारेछात्रोन्मुखीकरणम्।

- शिक्षाधिकारिभिः, प्रबन्धकैः, शिक्षकैः, समाजेन, अभिभावकैश्च कल्पितशैक्षिकसौविध्यानां सम्पूर्णविनियोग-ज्ञानप्रदानम्।

**नवशिक्षानीतेः पाठ्यचर्या: -** १९८६ तमेवर्षे नवशिक्षानीत्या राष्ट्रियशिक्षापाठ्यक्रमविषये सुविचार्यपरिवर्तनपूर्वकं नूतनपाठ्यचर्यायाः रूपकल्पनाकृता। या छात्रसंख्यावर्धने, चतुर्दशवयोपरिमितच्छात्रान् विद्यालयाकर्षणेतथानामाङ्कने च सक्षमा स्यादिति विचारधारायांबालकेन्द्रितदृष्टिकोणेन अस्याः संरचनाकृतावर्तते। विभिन्नस्तरीयाणां कृते भिन्नभिन्नतया विचाराःसूचिताः।**तत्र प्राथमिकस्तरीयपाठ्यचर्यायाः संरचनावसरेपरिगणितविचाराः यथा –**

१. भाररहितपाठ्यचर्या २.पाठ्यपुस्तकसमाश्रिता ३.उपकरणोपेतशिक्षणम्

४.शैक्षिणिकोपलब्धेः मूल्याङ्कनम् ५.स्थानिकावसरपूर्तिः ६. क्षमताधारितशिक्षणम्

७.सततमूल्याकलनप्रतिपुष्टिपूर्वकशिक्षणम् ८.कृत्याधारितपाठ्यप्रणाली

**तत्र माध्यमिकस्तरीयपाठ्यचर्यायाः संरचनावसरेपरिगणितविचाराः यथा -**

माध्यमिकशिक्षायाः 10(5+3+2)+2 इतिसूत्राधारिताः स्युः।उपरिनिर्दिष्टविचारैस्सहराष्ट्रैकता,समानता, समस्यादूरीकरणम्, उद्योगप्राप्तिः, व्यावसायिकवृत्त्यात्मककौशलाभिवृद्धिः, समाजचैतन्यमित्यादयः प्रधानांशाः।

इत्थम्उन्नतस्तरेऽपि वर्तमानस्य कृते अधिकप्राधान्यं प्रकल्प्य पाठ्यचर्यायाः संरचनायै विचारःकृतआसीत्।

**पाठ्यचर्यासंरचनायां मौलिकविचाराः–**

शैक्षिकानुशासनीयता,समानावकाशाः, समानविद्या, सामाजिकावसराः, समयसद्विनियोगः, सर्वाङ्गीणविकासः, प्रजातान्त्रिकता, आचरणीयता, आधुनिकीकरणं,बालकावसराः, फलोत्पादकशक्तिः, शास्त्रीयोपकरणनिर्मितिः, समाजस्य सुस्थिरता, तदोन्नतिश्च इत्यादयः मौलिकविचाराःवर्तन्ते।मौलिकविचारानुसृत्य पाठ्यचर्यायाः स्वभावंबहुधावक्तुं शक्यते। यथा –

१. पाठ्यचर्यैका प्रक्रिया (as a process) २. पाठ्यचर्यैका शैक्षिकोपागमः(A new approach)

३. पाठ्यचर्यैका पद्धतिः अभ्यासक्रमः वा। ४. पाठ्यचर्यैकः पाठः(As a praxis)

५. पाठ्यचर्यैका सम्प्रेषणात्मकपाठ्यक्रमः(A syllabus to be transmitted)

६. पाठ्यचर्यैका उत्पत्तिः, उपलब्धिः, उत्पादकता(Product) ७. पाठ्यचर्यैका पूर्वोत्तरौचित्यप्रक्रिया(Context)

८. पाठ्यचर्यैका परिष्करणात्मिकी शैक्षिकप्रक्रिया।(Context) ९. पाठ्यचर्यैका पुनर्निर्माणात्मिकी(Reconstruction)

१०. पाठ्यचर्यैका पूर्वोत्तरौचित्यप्रक्रिया(Development) ११. पाठ्यचर्यैका मूल्याकलनमूल्याङ्कनप्रक्रिया(Evaluation)

१२. पाठ्यचर्यैका कर्तव्योत्तरदायित्वप्रबोधकक्रिया

## पाठ्यचर्यासंरचनाया: सिद्धान्ता:

**पाठ्यक्रमसिद्धान्ता:**

- विषयकेन्द्रितसिद्धान्त:
- बालकेन्द्रियसिद्धान्त:
- क्रियाशीलात्मकसिद्धान्त:
- अनुभवात्मकसद्धान्त:
- भेदरहितसिद्धान्त:
- व्यावहारिकतासिद्धान्त:
- समर्पणसिद्धान्त:
- समसिद्धान्त:
- उत्पाकतासिद्धान्त:
- प्रथासंरक्षणसिद्धान्त:
- सृजनात्मकताया: सिद्धान्त:
- आवश्यकताया: सिद्धान्त:
- अभिरुचिवर्धकसिद्धान्त:
- विविधतासिद्धान्त:
- जैविकोपयोगिसिद्धान्त:

→ पाठ्यक्रमसंरचनावसरे निर्दिष्टसिद्धान्तेषु कतिपयानां सिद्धान्तानामनुसरणं क्रियते।

**पाठ्यचर्यासंरचनाया: सिद्धान्ता:**

- विषयकेन्द्रितसिद्धान्त:
- बालकेन्द्रियसिद्धान्त:
- क्रियाशीलात्मकसिद्धान्त:
- अनुभवात्मकसद्धान्त:
- भेदरहितसिद्धान्त:
- व्यावहारिकतासिद्धान्त:
- समर्पणसिद्धान्त:
- समसिद्धान्त:
- उत्पाकतासिद्धान्त:
- प्रथासंरक्षणसिद्धान्त:
- सृजनात्मकताया: सिद्धान्त:
- आवश्यकताया: सिद्धान्त:
- अभिरुचिवर्धकसिद्धान्त:
- विविधतासिद्धान्त:
- जैविकोपयोगिसिद्धान्त:

← पाठ्यचर्यासंरचनावसरे निर्दिष्टसिद्धान्तेषु सर्वेषां सिद्धान्तानामनुसरणं क्रियते।

## पाठ्यचर्यासंरचनाया: स्वरूपप्रकारवैविध्यता

प्रधानतया द्विधा अवलोक्यते

**पारम्परिकपाठ्यचर्या संरचना**

बहुधा वर्तन्ते। यथा -

- प्राचीनप्रणाली
- गुरुकुलप्रणाली
- शान्तिनिकेतनम्
- वनस्थलीया
- बुनियादी
- अरविन्दीया
- . . . .

**आधुनिकपाठ्यचर्या संरचना**


औपचारिकपाठ्यचर्या — अनौपचारिकपाठ्यचर्या

प्रधानतया चतुर्धा वर्तन्ते

| स्तरानुसारिणी | प्रदेशानुसारिणी | शास्त्रानुसारिणी | साहित्यानुसारिणी |
|---|---|---|---|
| पूर्वप्राथमिकी | ग्रामीणा | विज्ञानशास्त्रीया | आलङ्कारिकी |
| उत्तरप्राथमिकी | मण्डलस्था | सामाजिकी | सङ्गीतम् |
| माध्यमिकी | जिललास्तरीया | सङ्गणिकी | हस्तकलीया |
| उच्चमाध्यमिकी | नगरीया | क्रीडासम्बद्धा | ज्योतिषम् |
| . . . . . | . . . . | . . . . | . . . |

इत्येवम् असाधारणबालकानां विहाय पाठ्यचर्यासंरचनास्वरूपवैविध्यता

पाठ्यचर्यासंरचनायाः प्रभावकारकाणि




इत्थं पाठ्यचर्याशैक्षिकविषयैः सर्वैःपरस्परप्रभाविताभवतीति यथामति विचार्य व्यापकत्वात् समाप्यते।

**अनन्तशास्त्रं बहुलाश्च विद्याः, अल्पश्च कालोबहुविघ्नता च।**
**यत्सारभूतं तदुपासितव्यं, हंसो यथा क्षीरमिवाम्बुमध्यात्।। (चा. नी)**
**इतिशम्।**

**सन्दर्भग्रन्थसूची –**


१.**अभ्यसना मुदिंपु**, डा. गालि राधाकृष्ण डा. एन्. सुब्बरायुडु, जयश्री सिरीस्, जयम् पब्लिकेशन्स्, हैदराबादु – २०००.

२. **अभ्यसना मुदिंपु**, प्रो. दिगुमर्ति भास्कररावु, मास्टर् मैन्ड्स्, श्री नागार्जुन पब्लिकेषन्स्, गुन्टूर् – २०१६.

३. **विद्यामूल्याङ्कनम्**, डा. साम्ब मूर्ति, नीलकमल् पब्लिकेषन्स् , हैदराबादु - २००९.

४. **स्वीय अवगाहना**, डा. आर्. एस्. वरहाल दोर तथा डा.ए. कोमरय्य, जयम् सीरीस्, हैदराबादु – २०००.

५. **आत्मावगाहना**, प्रो. दिगुमर्ति भास्कररावु, मास्टर् मैन्ड्स्, श्री नागार्जुन पब्लिकेषन्स्, गुन्टूर् – २०१६.

६. Raj singh, Techniques of measurement and evaluation, Common welth publishers, New Delhi – 2008.